प्रारम्भाब्दः १९६४ ई.तः
ISSN 2348-9847

# सुरभारती

वर्षम् - ५२
अङ्कः ५२

## (शताब्दी विशेषाङ्कः)

वार्षिकी शोधपत्रिका २०१५ -१६



THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA
सत्यं शिवं सुन्दरम्

पारम्परिकसंस्कृताध्ययनविभागः
बरोडासंस्कृतमहाविद्यालयः
महाराजसयाजीरावविश्वविद्यालयःवटोदरम्

Scanned with CamScanner

प्रारम्भाब्दः१९६४ई.तः

ISSN 2348 9847

# सुरभारती

## वार्षिकी शोधपत्रिका २०१५-१६

वर्षम् - ५२

(शताब्दी विशेषाङ्कः)

अङ्कः ५२

प्रधानसम्पादकः
प्रो. प्रदीपसिंह चूण्डावत

सम्पादकः
डॉ. रामपालशुक्लः

सहसम्पादकाः
डॉ. हरिप्रसाद पाण्डेय
डॉ. योगेश त्रिवेदी
डॉ. कपिलदेव शास्त्री
श्री सुरेश पटेल

सत्यं शिवं सुन्दरम्

प्रकाशकः
पारम्परिकसंस्कृताध्ययनविभागः
बरोडासंस्कृतमहाविद्यालयः
महाराजासयाजीरावविश्वविद्यालयःवटोदरम्

Scanned with CamScanner

बाह्यविशेषज्ञाः
डॉ. देवेन्द्रनाथपाण्डेयः
डॉ. तुलसीदासपरौहा

परामर्शकमण्डलम्
डॉ. प्रफुल्लपुरोहितः
डॉ. मीरा दूबे
डॉ. चेतन पण्डया
श्रीमती फोरम चन्दाराणा
श्रीमती प्रज्ञा तन्ना

सत्यं शिवं सुन्दरम्

प्रकाशकः
पारम्परिकसंस्कृताध्ययनविभागः
बरोडासंस्कृतमहाविद्यालयः
महाराजासयाजीराव विश्वविद्यालयःवटोदरम् (गुजरात राज्यम्)

मुद्रक : गायत्री ओफसेट – केवडा बाग , वडोदरा. मो. ९८२५४ ३७४६६
डिजाईन– प्रयाग एन्टरप्राईज मो. ९७२७७८४५७३

Scanned with CamScanner

# अनुक्रमणिका


| विषयाः | लेखकाः | पृ.सं. |
| --- | --- | --- |
| शुभसंदेशः कुलाधिपतिः | | |
| शुभसंदेशः कुलपतिः | | |
| शुभसंदेशः प्रधानसम्पादकः | | |
| Note From th Chief Editor | | |
| संपादकीयम् | | |
| १. उव्टप्रयुक्तव्याख्यापद्धतिविश्लेषणम् | प्रो. देवेन्द्रनाथ पाण्डेयः | १ |
| २. कालिदासस्य वैश्विकं चिन्तनम् | डॉ. तुलसीदास परौहा | ५ |
| ३. उपनिषत्सु शैक्षिकदर्शनम् | जानकीशरणः | १२ |
| ४. वैदिकशिक्षाव्यवस्थायाः साम्प्रतकाले उपादेयता | डॉ. भावप्रकाश एम.गांधी | २१ |
| ५. आधुनिकशिक्षायां वैदिकशिक्षायाः प्रभावः | डॉ. शत्रुघ्नपाणिग्रही | २६ |
| ६. बुद्धियोगः | डॉ. कृष्णप्रसाद निरौला | ३० |
| ७. अन्योन्याश्रदोषपरिहारविचारः | प्रो. विनोदकुमार झा | ३५ |
| ८. आम्नायसम्मतं समभावसमीक्षणम् | डॉ. प्रयागनारायण मिश्र | ४० |
| ९. समालोचना | डॉ. रामपाल शुक्ल | ४५ |
| १०. आख्यानपरम्परायाम् महाभारतस्य व्याप्ति | प्रो. हरिप्रसाद पाण्डेयः | ४७ |
| ११. तन्त्रज्ञो महामुनिः पाणिनिः | क्षितीश्वर नाथ पाण्डेय | ५२ |
| १२. वर्तमानसामाजिकविषङ्गतिसमाधाने संस्कृतसाहित्यस्य प्रासङ्गिकता | डॉ. अमृतलालः भोगायता | ५६ |
| १३. सत्यव्रतशास्त्रिप्रणीते श्रीरामकीर्तिमहाकाव्ये विशेषच्छन्दोवलोकनम् | डॉ. ललित पटेलः | ५९ |


Scanned with CamScanner

ISSN 2348-9847

# उवटप्रयुक्तव्याख्यापद्धतिविश्लेषणम्

प्रो. देवेन्द्रनाथ पाण्डेयः

## प्रस्ताव-

अपौरुषेयो हि वेदः परब्रह्मणो निःश्वासभूतः साक्षान्नारायणरूपः। अस्यापौरुषेयशब्दराशेः व्युत्पत्यवगमनार्थं शास्त्राणि यानि रचितानि सन्ति तानि वेदाङ्गान्युच्यन्ते । परन्तु तेषामपि वेदाङ्गानाम् कतिचिदानि वेदाङ्गान्यर्थविज्ञानधाराप्रवाहेणार्थ श्रुतेः प्रसंगानुकूल प्रतिपादयितुं भाष्यकारान् प्रेरयन्ति । तत्र सर्वेषु व्याख्यासाधनेषु तारतम्यावगमनाय ब्राह्मणादिग्रन्थानाम् कर्ममीमांसादिविषयाणां देवता-ऋषि-छन्दोविज्ञानाम् , विनियोगविशेषादितत्वानाम् तदतिरिच्य बृहदेवतादिग्रन्थानाञ्च प्राप्तज्ञानमतीवावश्यकममन्यते । परन्त्वाधुनिकव्याख्यापेक्षित-भाष्यकरणधारायाः व्याख्याप्रबन्धनरूपेणा स्माकं शास्त्रे निदर्शनं काठिन्येनोपलभ्यते । अतः वैदिकव्याख्या पद्धतिः किमप्यनिर्वचनीयं वैशिष्ट्यमपेक्षे । यद्यपि यास्क-शौनकपाणिनिकात्यायनपतञ्जलिभृर्तहरिभिश्च प्रयासप्राचुर्येणास्याः भगवतोवेदस्य सार्वभौमव्याख्यायाः कृते बहवः पन्थानः आविष्कृताः सन्ति, येषामवलम्बनं सार्वभौमव्याख्यायाः कृते बहवः पन्थानः आविष्कृताः सन्ति, येषामवलम्बनं गृहीत्वा सर्वे प्रायशो भारतीयसंस्कृतभाष्यकाराः प्राचीनाः वैदिकसंहितानां भाष्याणि रचितवन्तस्तथापि तेषां सारमुपगृह्य शुक्लयजुर्वेदस्य प्रातिशाख्यस्य च व्यख्याता उवटः स्वकीयशुक्लययजुर्वेदीयमन्त्रभाष्यारम्भणात् पूर्व लोकसमक्षं वेदभाष्यनियमान् विवृणोति। उपर्युक्तभाष्योपकरणीभूतानाम् ग्रन्थानाम् तद्ग्रंथोक्तनियमानाम् प्रयोगं शुक्लयजुर्वेदस्यादिम-कण्डिकाविशदीकरणोपक्रम एव विश्लेषयति, यदनुसृत्य महीधरोपि स्वप्रज्ञया श्रौतसूत्रादिग्रन्थानाम् सन्दर्भ, याज्ञिकमीमांसाप्रधाने स्वीये मन्त्रभाष्ये विस्तृत करोति ।

यदा अनयोः भाष्यकारयोः उवट-महीधरयोः सायणाचार्यस्य भाष्यञ्चावलोक्य सधैर्य कश्चिज्जनो वेदार्थकरणे प्रवर्तते तदा तस्य महान् लाभो भविष्यति इति मे दृढो विश्वासः। तैर्वदभाष्यकारैः प्रस्तुतानाम् वेदभाष्यसामग्रीणां भाष्यप्रबन्धनधिया विवेचनमेवास्य शोधदलस्य प्रवत्तिनिमितम्-

## आलोचनासिद्धान्तः वैदिकभाष्यप्रवृत्तिश्चः

आधुनिकदृष्ट्या विचार्ये पक्षे आलोचनायाः बहवः पक्षाः राद्धान्ता वा शैक्षणिकजगति प्रसिद्धाः सन्ति, येष्वावश्यकतानुसारं मुख्यरूपेणाधस्ताल्लिखिताः विषयाः अन्विताः दृश्यन्ते ग्रन्थः ग्रन्थप्रति पाद्यविषयः,ग्रंथकारस्यैतिह्यम् तस्य च ग्रंथकारस्य भावनाधिगन्तुं विशेषवाक्यपदप्रकरणादीनां विश्लेषणम्, साहित्यशास्त्रतत्वानुसारञ्च विशिष्टस्य ग्रंथस्य परीक्षणम् तत्वचिन्तनम् ग्रन्थविशेषस्य प्रवृत्तिनिमितम् इत्यीदनि तत्वानि प्रायसो भवन्ति परिशीलनयोग्यानि । अतः वैदिकभाष्यप्रवृत्तावपि तत्वानीमानि कार्यरतानि दृश्यन्ते । परन्तु भाषाविशेषगौरवकारणात्तथा न दृश्यन्ते वर्गीकृतानि यथा आधुनिकसाहित्यसमीक्षण-विश्लेषणपरिशीलनसन्दर्भेषु नियानिदृश्यन्ते ।



Scanned with CamScanner

एवञ्चात्रैतदप्यस्ति विवेचनायं यदनुसंधानविधौ , साहित्यक्षेत्रे या प्रक्रिया सामान्यरूपेण, विशेषरूपेण वाश्रीयते सैव प्रक्रियास्माकं वैदिकभाष्यकर्तृभिः वैदकमन्त्राणां भाष्यकरणेप्याश्रीयते । अर्थात् भाष्यमपि वैदिकभाष्यकर्तभि वैदकमन्त्राणां भाष्यकरणेप्याश्रीयते । अर्थात् भाष्यमपि वेदार्थस्य विशदीकरणं भवति यत्र नैके नूत्राः विषयाः भाष्यकर्तुः प्रज्ञया, व्युत्पत्तिकुशलतया विशेषप्रतिभया च प्रासंगिकरुपेणोद्धाटिता जायन्ते । अत्रैतदुल्लेखनीयमस्ति यत् विविधपदयोजनामवलोक्य वैदिकमन्त्राणाम् भाष्यकारः कश्चित् भाष्यकर्मसहायकीभूतैः सह मन्त्रगतं संकेतविशेषमुपगृह्य तथैवोद्धाटयति विदुषां समक्षं यथाद्य विशेषानुसंधान प्रक्रियामार्गमुपगृह्य तथैवोद्धाटयति विदुषां समक्षं यथाद्य विशेषानुसंधान प्रक्रियामार्गमनुसृत्याधुनिकाः शोधार्थिनः प्रतिपादयन्ति शोधकर्मणि । तथा चैतदवश्यमेवाङ्गीकरणीयमस्ति यद् वेदभाष्यणामेवानुसंधानप्रधाना छाया, आधुनिकानुसंधानविधौ दृश्यत इति ।

प्रायशः कला-साहित्य-संस्कृतिविषयानुसंधानेषु संमीक्षात्मकेवानुसंधान विधीयते । तस्मातत‌द्विषयकाः अनुसंधेयपदार्थो भाष्यधर्मेष्वनुस्यूताः जायन्ते सहजतया। विशेषरूपेण वैदिकभाष्यकाराणाम् दृष्टिर्भवति दूरं गता, येन कारणेन तेषां वैविध्यपूर्ण भाष्यमप्यलं वैदिकमन्त्राणामर्थावबोधायैव सामान्ययरीत्या न भवति प्रत्युन्मन्त्रब्राह्मणवाक्येषु तत्पदेष्वपि त्रैकालिकयथार्थदृष्टिमपि प्रसारयति लोके, परन्तु तदवगमनायाधीतशास्त्राणामपि विदुषां कृते वर्गीकरणम् किमपि विहितं शास्त्रे प्राप्यत-यथा,

**अक्षण्वन्तः कर्णवन्तः सखायः मनोजवेष्वसमाबभूवुः ।**

आदघ्नासः उपकक्षासः उत्त्वै ह्रदाइव स्नात्वा उत्वे ददृशे ।। ऋ.वेद-१०-७१-७ अनेन प्रकारेणैतत्सिध्यति यत् समानेन्द्रियसहिता अपि जनाः यदार्थावगमने भिन्नस्तरीयाः दृश्यन्ते, यस्य निदर्शनमेकस्यामृचि विहितमस्ति, तथैव पतञ्जलयपि व्याकरणशास्त्रप्रयोजनाधिकरणप्रसंगे प्रतिपादयति- रक्षोहागमलघ्वसंदेहाः प्रयोजनम्-अर्थात् रक्षार्थ वेदानामध्येयं व्याकरणम् । लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यति ।

अनेन प्रकारेणैतदवगम्यते यदुवटस्य वैदिकव्याख्यापद्धतिरस्त्येयको विशेष आविष्वकारःवैदिकसाहित्यक्षेत्रे यस्य प्रणयनम् चकार उवटः सर्वाणि वेदाङ्गानि सम्यगधीत्य परिशील्य चातन्माध्यमेम केचन वेदव्याख्याधर्मान् स निर्धारयामास । यद्यपि व्याख्याधर्माः शास्त्रेषु पूर्वत एवासन् विस्तार्य महानुभावः स्वविवेचनकौशल्येन सर्व क्रमिकरूपेणात्र स्व देवभाष्ये विस्तार्य तदनुसार्येव भाष्यञ्चकार ।तेषु केचन् विधयः अत्र वेदवेख्याधर्माणामतिसंक्षेणोपस्थाप्यन्ते-

व्युत्तपत्तिनिरुक्तिप्रक्रिया-शुक्लयजुर्वेदस्य माध्यन्दिनसंहिताया भाष्यकरणे, उवटः प्रमुखतया व्याकरणवेदाङ्गमाश्रित्य यावच्छक्यं वैदिकपदानां निरुक्तिं व्युत्पत्तिश्च विधत्ते । अर्थात् व्याकरणाधारितव्युत्तपत्तिमूला निरुक्तिं प्रधानतया विधत्तै वैदिकमन्त्राणां व्याख्याने प्रासंगिके ह्युवटः । स स्मरति



Scanned with CamScanner

सदा निरुक्तनियमान् येषु निर्वचननियमेष्वन्यतमो नियमोस्ति प्रतिपादितो यास्केन, यथा-तद्यत्र स्वरसंस्कारौ समर्थो प्रादेशिकेन गुणेनान्वितौ स्याताम् तथा तानि निर्ब्रूयात्, यथा-आप्यायध्वम् इत्यत्र ओप्यायी वृद्धौ णिचो लोपः इति उवटः, समन्ताद्वर्धयध्वं ओप्यायी वृद्धौ-इति महीधरः द्र.शु.य.वेदः १.१ अतः व्याकरणवेदाङ्गस्य प्रधानोपकारितां वेदं प्रत्यनुभूय सर्वप्रथमं स व्याकरणमेवाश्रयते उवटः वैदिकमन्त्राणां व्याख्यानाय ।

आकांक्षा, योग्यता, सन्निधिश्च व्याकरणव्युत्पत्याश्रय एवैतेषां आकांक्षा, योग्यता, सन्निधिरिति त्रयाणां व्याख्योपकारिका तत्वानाम् उपयोगिता मत्वा उवटः स्वकीयव्याख्याधर्मे स्थानं निर्धारयति, यथा कथयति उवटःसाकाङ्क्ष पदार्थो निराकाङ्क्षो वाक्यार्थः इति । तद्यथा गौरित्युक्ते किमित्याकाङ्क्षा भवति, ततो गच्छतीत्युक्ते निराकाङ्क्षं भवति । अग्रे भावमिममधिकं स्पष्टयन् ब्रूते अथेदानीं गौर्गच्छतीत्युक्ते यत्र गौरेवाहदोहादिभ्यो व्यावृत्य गमने अवतिष्ठते । गमनं चान्यगन्तृभ्यो व्यावृत्व गव्येवावतिष्ठते अयं वाक्यार्थः । स एव प्रकरणाविरोधीवाक्यार्थः पदार्थनियमे हेतुः । पदन्तु पदार्थपरिज्ञानहेतुः । अयं पदार्थवाक्यार्थयोर्विशेषः द्र. उवटभाष्यारंभभागः। अतः तस्यानुसारं शास्त्रीयदृष्ट्या च वैदिकमन्त्रव्याख्यायाम् न केवलं व्याकरणात्मिका व्युत्पत्तिरेव निरुक्तिश्चैव वा निरुक्तानुसारमपेक्षिता भवति प्रत्युत् आकाङ्क्षादित्रयाणामुक्तानाम् अप्यावश्यकता भवत्येव । तथा चोवटः स्वकीयभाष्ये तेषां त्रयाणामाकांक्षादीनाम् आलोके वैदिकमन्त्रान् व्याख्यातुमुक्रमते । तेषामाश्रये वैदिकमन्त्रव्याख्याने मन्त्राणां संहिताक्रमस्य विनियोगप्रवृत्तिनिमित्तावगमनाय भाष्यकारस्य सौविध्यमुपाजायते । तात्पर्यमिदमस्ति यदस्माकम् वौदिकर्षयः लक्ष्यैकचिताः भवन्तः यथागतं सम्पूर्ण वैदिकवाङ्मयम् तपसा प्राप्यनुः । तेषां लोकदृष्ट्या, अनुवादे लोके प्रयुज्यमानस्य विधेराश्रयः अपेक्षितः। उदाहरणं यथा-इषे त्वा, इत्येकोस्ति मन्त्रः कण्डिकायाः अन्यतमः याज्ञिकसमाख्याप्रमाणत्वात् । अयङ्खल्वंशोमन्त्रस्य, सम्पूर्णस्याःकण्डिकायाः विशेषां क्रियामभिधते । परन्तु व्यावहारिकेपक्षे सम्पूर्णस्या एव कण्डिकायाःमन्त्रत्वमङ्गीक्रियते जनैः तत्रैकतिङ् वाक्यम् ष सुप्तिङन्तं पदम् इत्यादिशास्त्रोक्तदिशा तिङं विना वाक्यं निराकाङ्क्ष न तिष्ठति । तत्सर्वमेवाभिप्रत्योवटः स्वभाष्यकरणप्रक्रियायाम् कथयति व्याख्याधर्मानित्थम्

अतिरिक्तं पदं त्याज्यं हीनं वाक्ये निवेशयेत् ।
विप्रकृष्टं तु संदध्यात् आनुपूर्व्यश्च कल्पयेत् ।।
लिङ्गंधातु विभक्तिश्च योज्यं वाक्यानुलोमतः ।
यद्यत्स्याच्छान्दसं वाक्ये कुर्यातततु लौकिकम् ।।

एतेषां वैदिकमन्त्रव्याख्याधर्माणामुदाहरणान्यपि बहूनि प्रस्तुतानि सन्त्युवटेन स्व भाष्ये । तेषामुल्लेखनाद्वरमस्त्यत्र दिग्दर्शनम् तस्य व्याख्यापद्धतेः ।

उपर्युक्तविवेचनान्नैतदवगम्यते सारल्येन यद्वेदिकी भाषा एकार्षीभाषास्ति यतः प्रसूतास्ति लौकिकी संस्कृत भाषा । अर्थात् आर्षीभाषा लोकभाषायाः स्वरूपग्रहणाय लौकिकसंस्कृतरूपं जग्राह, यथा उपर्युक्तान्यपि पद्यानि ध्वनयन्ति । तस्मिन् लौकिकरूपे वैदिकलकारेषु लिङ्गेषु वचनादिष्वपि परिवर्तनं बहुविधं जातम् यस्य विधते आचार्यपाणिनिः। अत एवास्य वैदिकीप्रक्रिया पृथग्रूपेणावलोक्यते । तस्मादेव कारणात् सर्वलकारापवादरूपो



Scanned with CamScanner

लेट्लकारः वेद एव प्रसिद्धो जातः । अनेनैतदपि संसूच्यते यत् लौकिकं संस्कृतमवहेल्य यादृच्छिकप्रयोगो ज लोके स्वकीयदौर्बल्यकारणात् न प्रयोक्तुं योग्योस्तीति, तथाकरणे वैदिकमर्यादा हन्येत । अस्मादपि कारण भाष्यकाराः वेदस्य अर्थापनधियालिङ्गादिव्यत्ययमर्यादायामेव भाष्यकरणे प्रवर्तन्ते । अतः उवटः अपि स् विदित्वा स्वभाष्यकरणे वेदस्य प्रवृत्तो दृश्यते । एतानुक्तान् नियमानतिरिच्यापि केचन सन्ति अन्ये वेदव्याख नियमाः येषामनुपालनं कुर्वन् प्रवर्तितो प्रतिभाति उवटः यथा देवतर्षिच्छन्दसां सम्यग्रहस्यावगमनालोके वैदि पदानां प्रसंगानुकूल भाष्यमिति ।

एतदस्वाभिरवगन्तव्यमस्ति यत् वैदिकव्याख्याधर्मप्रवृत्तौ वैदिकसाहित्यसन्दर्भे छन्दसां कियदस्ति प्रयोज दन्यथाप्रवृत्तौ कः प्रत्यवायः भवति जनानाम् इति यद्यपि स्पष्टतया अथवा सामान्यबुद्ध्या नाधिगन्तुं शक न्तु तत्र पूर्वाचार्याणामृषीणाञ्च मार्गनिर्देशमवाप्यैतत्प्रतीयते यत् निश्चितमेव काञ्चिच्छक्तिं छ दिकमन्त्रपाठकरणे वैदिकभाष्यकरणे च वेदभाष्यकर्तरि वेदपाठकर्तरि च जनयति वेदः यतो हि ऋषि त्तिः कस्मि